संस्कृतवाङ्मये वेदांगेषु शिक्षायाः भूमिका

बिरंचीनारायणरथः
शोधछात्रः, शिक्षाशास्त्रविभागः
श्री.ला.ब.शा.रा.स.विश्वविद्यालयः, नवदेहली–110016

सारांशिका

अस्याः संस्कृतभाषायाः यस्यां विश्वस्य आदिमः ग्रन्थः ऋग्वेदः विरचितोऽभूत। अस्यामेव देववाण्यां क्रमशः ऋग्यजुः सामाथर्वाणः इति चत्वारः वेदाः, ब्राह्मणसाहित्यम्, आरण्यकानि, उपनिषदा ततश्च क्रमशः षड्वेदाङ्गानि यथा–

छन्दः पादौ तु वेदस्य, हस्तौ कल्पोऽथ पठ्यते,
ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्,
तस्मात्साङ्गमथित्येव ब्रह्मलोकेमहीयते।

चतुर्दशाविद्याः आयुर्वेदादि विज्ञानं षड्दर्शनानि महत्लौकिकसाहित्यादिकं विरचितं वर्तते। अस्माकं संस्कृति वेदाश्रिताः। विश्वासु सर्वासु भाषासु प्राचीनतमा प्राचीन भाषा संस्कृत भाषा। भारतीय बाहुल्येन संस्कृत शब्दाः उपयुक्ता। संस्कृतात् एव अधिका भारतीय भाषा उद्भूता तावदेव भारत–यूरोपीय भाषा वर्गीयाः अनेका भाषा संस्कृतप्रभावं संस्कृत शब्द प्राचुर्यं च प्रदर्शयन्ति। संस्कृत भाषा यल्लिख्यते तदेव पठ्यते। अन्यासु यल्लिख्यते तन्न पठ्यते।

मुख्य शब्द : संस्कृतवाङ्मये, वेदांगेषु, शिक्षायाः, व्याकरणं, वेदाश्रिताः।

भूमिका

अङ्गशब्दस्य व्युत्पत्तिलभ्यः अर्थोऽस्ति 'उपकारकः'। 'अङ्गचन्ते ज्ञायन्ते अमोभिरिति अङ्गानि। अर्थाद् येन कस्याऽपि वस्तुनः स्वरूपज्ञाने साहाय्यं मिलति तमङ्गमिति कथ्यते। वेदः स्वयमेवैकः दुरूहो विषयोऽस्ति। तदर्थज्ञाने, तस्य कर्मकाण्डस्य प्रतिपादने यान्युपयोगीनि शास्त्राणि सन्ति तान्येव वेदाङ्गानिभवन्ति । वेदस्य यथार्थज्ञानलाभायकृषण्णां विषयाणां ज्ञानमपेक्षितं भवति। वेद–मन्त्राणामवितथोच्चारणमेव प्रथममावश्यकं वस्त्वस्ति। शब्दमयमन्त्राणां यथार्थोच्चारणाय प्रवर्त्तमानं वेदाङ्ग 'शिक्षा' इत्यभिधीयते। वेदस्य मुख्य–प्रयोजनं वैदिककर्मकाण्डस्य यज्ञयागस्य च यथार्थानुष्ठानमस्ति। अस्मिन्नर्थेप्रवृत्तमङ्गं 'कल्प' इति कथ्यते। कल्पस्य व्युत्पत्तिलभ्योऽर्थो भवति 'कल्प्यते समर्थ्यते यागप्रयोगोऽत्र' इति। वेदानां रक्षकत्वादु, वेदार्थावबोधनेसहायकत्वात् प्रकृतिप्रत्ययोपदेशपुरःसरपदस्वरूप प्रतिपादकत्वा दर्थनिर्णयनकृत्सा–धनेष्वन्यतमसाधनत्वेन प्रयुक्तत्वादु व्याकरणं नाम वेदाङ्गं नितान्तमेव महनीयं श्रेष्ठश्च अङ्गमन्नेषु स्मृतम्। निरुक्तस्यास्ति विषयः– वैदिकपदानां व्युत्पादनम्।

निरुच्यते निश्शेषेणोपदिश्यते तत् तदर्थावबोधनाय पदजातं यत्र तन्निरुक्तमिति कथ्यते।

तच्छाखं शिक्षानाम येन वेदमन्त्राणामुच्चारणं शुद्धं सम्पाद्येत। वेदे स्वर–स्य प्राधान्यं सर्वविदितम्, स्वरज्ञानं च शिक्षाऽऽयत्तम्, अत एवेदं शिक्षाशास्त्रं वेदाङ्गम्। शिक्षाशास्त्रप्रयोजनमुक्तं तैत्तिरीयोपनिषदारम्भे। यथा–'अथ शिक्षां व्याख्यास्यामः वर्णः, स्वरः, मात्रा, बलम्, साम, सन्तान इत्युक्तः शिक्षा–ध्यायः। तत्र वर्णोऽकारादिः, स्वरोदात्तादिः, मात्रा ह्रस्वादिः, बलं स्थान– प्रयत्नी, साम निषादादिः, सन्तानो विकर्षणादिः। एतदवबोधनमेव शिक्षायाः प्रयोजनम्।

यथा वैदिकविधीनां सम्पादनार्थ ब्राह्मणग्रन्था उपयुज्यन्ते, तथैवोच्चारण– प्रयोजनेन शिक्षाया उपयोगो वाञ्छचते। वेदानां वैदिकसाहित्यस्य वाऽध्यय–नाध्यापनविषयकविधीनां निर्देशः शिक्षाशास्त्रे कृतः। शिक्षा स्वरवर्णाद्युच्चारणानि केन प्रकारेण कर्त्तव्यानीत्येतस्मिन् विषये उपदिशति। सायणस्य ऋग्वेद–भाष्यभूमिकायामुक्तम्–

'स्वरवर्णाद्युच्चारणप्तकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षेति।

वेदपाठावसरे शुद्धमुच्चारणं स्वरक्रिया च युक्ता काम्येते। अशुद्धोच्चारण–युक्तो भ्रष्टस्वरश्च वेदपाठो महदु दुष्फलं जनयति। स परमहानिकृद् भवति। यज्ञयागोपासनादिकं यत्कार्यमिष्टलाभाय क्रियते, तस्माद्विशिष्टलाभो न कदापि अशुद्धेनोच्चारणेन समवाप्तः सञ्जायते। तद्विधमशुद्धोच्चारणयुक्तं कार्य तु विपदं महती मुत्पादयति। श्रूयते यत्पुरा

यामुक्तम्–

'मन्त्रो होनः स्वरतो वर्णतो वा, मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति, यथेन्द्रशत्रुः स्वरतोऽपराधात्।।'

वेदोच्चारणस्य युक्ततायै स्वरक्षाज्ञानमपेक्ष्यते समीचीनम्। स्वर उदात्तानुदात्तस्वरितभेदेन त्रिविधः। 'उचौरुदात्तः', 'नीचौरनुदात्तः', 'समाहारः स्वरितः' इत्येतानि पाणिनिना तेषां त्रयाणां लक्षणानि प्रोक्तानि।

'अनुदात्तपदमेकवर्ज्यम्' इत्येतस्मिन् पाणिनीये सूत्रेऽभिहितं यद वेदस्य प्रतिपद्मवश्यमेव केनापि उदात्तेन स्वरेण संश्लिष्टं भवति, अवशिष्टाश्च स्वराः भवन्त्यनुदात्ताः। तेष्वेवानुदात्तेषु स्वरेषु अन्यतमः स्वरो हि परिस्थितिविशेषे स्वरितो जायते। स्वरप्रधानतायाः कारणं वेदेष्वस्ति, तेषां स्वराणामर्थनियन्त्रणत्वम्। केन प्रकारेण स्वराणामर्थनियन्त्रणकारित्वं भवतीत्युपरिष्टादुदाहरणं निधायाभिहितमेव। वेदेषु शुद्धोच्चारणं सर्वप्रथमं वाञ्छितं भवति,

तच्च शुद्धोच्चारणं शिक्षा समु– पदिशति। एतस्मादेव हेतोः षड्स वेदाङ्गेषु शिक्षाऽङ्गस्य मूर्धन्यत्वमाम्नातम्। शिक्षाया अभिमतो विषयः प्रातिशाख्येषु दृश्यते। प्रातिशाख्यग्रन्थाः शिक्षा शास्त्रस्य प्राचीनतमाः प्रतिनिधय इव सन्ति। संहितापाठसम्बन्धिनः सर्वेऽपि विषयास्तत्र साङ्गोपाङ्गतया प्रतिपादिताः।

शिक्षाशास्त्रेतिहासः पुरातनतरः। परं न तद्विषयकाः प्राचीनतरा ग्रन्था उपलभ्यन्ते। श्रीवाचस्पतिगैरोला स्वकीये इतिहासे लिखति यत् सत्यकेतुविद्या–लङ्कारस्य मतमिदं यत् 'जैगीषव्यस्य शिष्यो बाभ्रव्यः शिक्षाशास्त्रं प्रणिनाय। महाभारते शान्तिपर्वणि आचार्यगालवकृतस्य शिक्षाग्रन्थस्योल्लेखो लभ्यते। भण्डारकरशोधसंस्थान–पूनातो भारद्वाजशिक्षायाः प्रकाशनं जातमस्ति। तत्र नागेश्वरभट्टस्य टीका च र्त्तते । नागेश्वरमतेन स ग्रन्थो भारद्वाजेन प्रणीतः। शिक्षासङ्ग्रहनामके ग्रन्थे द्वात्रिंशच्छिक्षापुस्तकानां सङ्ग्रहोऽवाप्यते। शिक्षा इमा–चतुर्णामपि वेदानां भिन्नभिन्नशाखास्वात्मानं सम्बध्नन्ति। श्रीबलदेव उपाध्यायः स्वकीये 'वैदिक साहित्य और संस्कृति' इत्येतदभिधेये ग्रन्थे याज्ञवल्क्यशिक्षा–वासिष्ठीशिक्षादिसंज्ञकानां विशतिग्रन्थानामुल्लेखं विदधानो दृश्यते। साम्मतं समवासा पाणिनीयशिक्षा प्राचीनशिक्षासूत्राणां साहाय्येन प्रणीताऽभूदिति बुधानां विचारः। अद्यतने युगे पाणिनीयशिक्षां स्वामी दयानन्द उद्दार। इदमपि स्मरणीयमत्र यदिदानीं शुक्लयजुर्वेद याज्ञवल्क्यशिक्षा, सामवेदे नारद–शिक्षा, अथर्ववेदे माण्डकीशिक्षा, किश्च ऋग्वेदे पाणिनीयशिक्षाः प्राप्यन्ते न च अन्या काऽपि।

(1) वर्णस्याभिप्रायः अक्षराणि भवन्ति। वेदतत्त्वस्य ज्ञानार्थं संस्कृतवर्णमालायाः ज्ञानं नितान्त मावश्यकमस्ति। पाणिनीयशिक्षातः ज्ञानं भवति यत् संस्कृतवर्णमालायां ६३ अथवा 64 वर्णा निर्धारिता भवन्ति। न केवलमियं संख्या संस्कृतभावार्थ–मेव, प्रत्युत वैदिककाले प्रयुक्तं प्राकृतभाषार्थमपि नियता आसीत्।

(2) स्वर– स्याभिप्रायः–उदात्तानुदात्तस्वरितैः सहास्ति।

(3) मात्राशब्देनोच्चारण–सापेक्षसमय एवास्ति। मात्रा त्रिधा भवति–हस्व–दीर्घ–श्रुताश्चेति। एकमात्रो भवेदु ह्रस्वः, द्विमात्रो दीर्घ उच्यते, तथा त्रिमात्रो प्लुतसंज्ञको भवति।

(4) बलेन स्थानप्रयत्नयोर्बोधो भवति। स्वर–व्यञ्जनयो–रुच्चारणकाले ताल्वादि यत्स्थानस्य वायुना स्पर्शो भवति तदेव स्थानमिति। स्थानानि चेमान्यष्टसंख्य–कानि भवन्ति। प्रयत्नोऽपि द्विधा भवति आभ्यन्तरो वाह्यश्चेति। आभ्यन्तर–प्रयत्नः चतुर्धा विभक्तोऽस्ति–स्पृष्ट–ईषत्स्पृष्ट–विवृत–संवृतभेदात्। बाह्य–प्रयत्नोऽपि एकादशधा–विवार–संवार–श्वास–नाद–घोष–अघोष–अल्पप्राण–महा–प्राण उदात्तस्वरिताश्चेति।

(5) सामशब्दस्यार्थो भवति 'साम्यम् अर्थादु दोषरहितअनुदात्त–माधुर्यादिगुणयुक्तमुच्चारणम्। तद्यथा–

'माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।
धैर्य लयसमर्थश्च षडेते पाठका गुणाः।।(पा० शि० ३३)

विपरीतमस्याधमपाठकेषु परिगणितप्रकाराणां निर्देशोऽपि तत्रैव। यथा–

'गीती शीघ्री शिरः कम्पी यथा लिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाऽधमाः।।

शङ्कितभीतादिपाठोऽपि अनर्थको भवति। यथा–

'शङ्कितं भीतमुत्कृष्टमव्यक्तमनुनासिकम्।
काकस्वरं शिरसिगं तथा स्थानविजितम्।। (पा० शि० ३२)
उपांशुदष्टं त्वरितं निरस्तं विलम्बितं गङ्गदितं प्रगीतम्।
निष्पीडितं ग्रस्पपदाक्षरश्च वदेन्न दीनं न तु सानुनास्यम्।।'
(पा० शि० ३४।३५)

(6) सन्तानः सन्तानशब्दस्यार्थो भवति संहिता, अर्थात् पदानानतिशयसन्निधिः। सत्यपि पदानां स्वतन्त्रास्तित्वे यदा कदा पदद्वयस्यावश्यकतानुसारेण शीघ्रतयकस्यानन्तर सेकस्योच्चारणं भवति, तदेवोच्चारणं संहितापदेन उपदिश्यते। पदेषु प्रथमं संहिता भवति तत्पश्वादेव सन्धिर्भवितुमर्हति। यथा–'वायो आयाहि' अत्र स्वतन्त्रे द्वे वैदिकपदे स्तः। यदेकस्मिन्नेव वाक्ये पदद्रथस्य सहैवोच्चारणं भवति तदा सन्धिकारणेनात्र किमपि परिवर्तनं भवति। तदा पूर्वोदाहरणस्य रूपं 'वायवायाहि' भविष्यति। अनेनैव प्रकारेण 'इन्द्राग्नो आगतम् अत्र प्रकृतिभावो भविष्यति ।

उपसंहारः

प्रत्येकस्मिन् वेदे वर्णानामुच्चारणं समानरूपेण भवितुं नार्हति। तेषामुच्चारणे पार्थक्यं भवत्येवेति। उदाहरणाय–मूर्धन्यः ष' इत्येतस्य शुक्लयजुर्वेदे रेफेण सहोष्मवर्णन सह संयुक्ते सति चास्योच्चारणं 'ख' इव भवति। किञ्चा–न्यवेदेष्वस्योच्चारणं विशुद्धमूर्धन्यः व' इव भवति। यथा पुरुषसूक्तस्य प्रधान–मन्त्रगत ''सहस्रशीर्षा पुरुषाः अत्र ऋग्वेदिनामुच्चारणे यत्र 'शीर्षा' इत्येतस्य 'ष' इति मूर्धन्यः स्पष्टत एव भवति, तत्र माध्यन्दिनशाखीयानामुच्चारणे शरिखा पुरुखः' इत्युच्चारणं भवति। अस्य विशिष्टपरिचयस्तत्तद्वेदस्यैव शिक्षायां विस्तरेण सह प्रदत्तमस्ति। इदमेव कारणमस्ति यत् प्रत्येकस्य वेदस्य स्वकीया शिक्षाऽस्ति। तस्यामेव शिक्षायां तत्तद्वेदविशेषस्योच्चारणस्याऽपि विधानं वर्त्तते। अतः एवं प्रकारेण वेदपुरुषस्य भ्राणस्थानीयं भवति शिक्षाशास्त्रम्।

सन्दर्भ :

1. उपाध्याय आचार्य बलदेवः संस्कृतसाहित्य का इतिहास, शारदानिकेतन वाराणसी, दशम संस्करण–2009।
2. मिश्रः श्रीरामचन्द्रः, "संस्कृतसाहित्येतिहासः" चौखम्भा विद्या भवन, वाराणसी, 1993।
3. पाणनीयशिक्षा
4. ऋग्वेद– भाष्यभूमिका
5. तैत्तिरीयोपनिषद
6. वैदिकवाड्मय का इतिहास